# Shri LakShmistotra by LopAmudra

# શ્રીલક્ષ્મીસ્તોત્રં લોપામુદ્રા

## Document Information

Text title : lakShmIstotralopAmudrAkRita lakShmInarAyaNasaMhitAyAM

File name : lakShmIstotralopAmudrA.itx

Category : devii, lakShmI, stotra, devI, lakShmInArAyaNIyasaMhitA

Location : doc_devii

Transliterated by : pranav.tendulkar and vrushali

Proofread by : pranav.tendulkar and vrushaliagarkar at gmail dotcom

Description-comments : lakShmInarAyaNasaMhitA

Latest update : May 5, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 25, 2024

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસ્તોત્રં લોપામુદ્રા

॥ પૂર્વ પીઠિકા ॥

લોપામુદ્રા શ્રિયાઃ પાદૌ ધૃત્વાનનામ સાદરમ્ ।
વવન્દે સ્તવનં ચક્રે તવ લક્ષ્મિ સદા સતી ॥ ૧॥

શ્રુણુ તત્ સ્તવનં યેન સ્તાવકાઃ સ્યુર્ધનાશ્રયાઃ ।
નૈકસમ્પત્ સમાયુક્તાઃ ત્વયા પ્રસન્નયેક્ષિતાઃ ॥ ૨॥

॥ મૂલપાઠ શ્રીલોપામુદ્રા ઉવાચ ॥

માતર્નમામિ કમલે પદ્માયતસુલોચને ।
શ્રીવિષ્ણુહૃત્કમલસ્થે વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૧॥

ક્ષીરસાગરસત્પુત્રિ પદ્મગર્ભાભસુન્દરિ ।
લક્ષ્મિ પ્રસીદ સતતં વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૨॥

મહેન્દ્રસદને ત્વં શ્રીઃ રુક્મિણિ કૃષ્ણભામિનિ ।
ચન્દ્રે જ્યોત્સ્ના પ્રભા સૂર્યે વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૩॥

સ્મિતાનને જગદ્ધાત્રિ શરણ્યે સુખવર્દ્ધિનિ ।
જાતવેદસિ દહને વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૪॥

બ્રહ્માણિ ત્વં સર્જનાઽસિ વિષ્ણૌ ત્વં પોષિકા સદા ।
શિવૌ સંહારિકા શક્તિઃ વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૫॥

ત્વયા શૂરાગુણીવિજ્ઞા ધન્યામાન્યાકુલીનકા ।
કલાશીલકલાપાઢ્યૈ વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૬॥

ત્વયા ગજસ્તુરઙ્ગશ્ચ સ્ત્રૈણસ્તૃર્ણં સરઃ સદઃ ।
દેવો ગૃહં કણઃ શ્રેષ્ઠા વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૭॥

ત્વયા પક્ષીપશુઃ શય્યા રત્નં પૃથ્વી નરો વધૂઃ ।
શ્રેષ્ઠા શુધ્દા મહાલક્ષ્મિ વિશ્વમાતર્નમોઽસ્તુ તે ॥ ૮॥

લક્ષ્મિ શ્રી કમલે પદ્મે રમે પદ્મોદ્ભવે સતિ ।
અબ્ધિજે વિષ્ણુપત્નિ ત્વં પ્રસીદ સતતં પ્રિયે ॥ ૯॥

॥ ફલ શ્રુતિઃ ॥

ઇતિ સ્તુતા પ્રસન્ના ચ શ્રીરુવાચ પતિવ્રતામ્ ।
લોપામુદ્રે મુને જાને વાં યત હૃત્તાપકારણમ્ ॥ ૧॥

સુચેતનં દુનોત્યેવ કાશીવિશ્લેષજોઽનલઃ ।
યુવાં વારાણસીં પ્રાપ્ય સિધ્દિં પ્રપ્યસ્થ ઈપ્સિતામ્ ॥ ૨॥

યે પઠિષ્યન્તિ મત્સ્તોત્રં તાપદારિદ્યનાશકમ્ ।
ઇષ્ટસમ્પત્પ્રદં તેષાં જયસન્તતિકારકમ્ ॥ ૩॥

મમ સાન્નિધ્યદં બાલગ્રહાદિવ્યધિનાશનમ્ ।
ભવિષ્યતિ મમ સારુપ્યાદિપ્રમોક્ષણં તથા ॥ ૪॥

॥ શ્રીલક્ષ્મીનરાયણસંહિતાયાં શ્રીલોપામુદ્રાકૃત શ્રીલક્ષ્મીસ્તોત્રમ્ ॥

Encoded and proofread by
Pranav and Vrushali Tendulkar pranav.tendulkar at gmail.com

*Shri LakShmistotra by LopAmudra*

pdf was typeset on September 25, 2024

Please send corrections to *sanskrit@cheerful.com*